Lokadarpana
Vol. VI, No. 1, 109-121, April, 2026
Pandit Shree Lokanath Luitel Smriti Pratishthan, Dharan

# न्यायविशिष्टाद्वैतदर्शनाभिमतस्मृतिस्वरूपम्

**माधव घिमिरे***

naman.sarma4@gmail.com

Received Date: February 15, 2026 - Accepted Date: March 28, 2026

**लेखसारः**

प्राच्यदर्शनेषु संविदः स्वरूपमादाय दार्शनिका बहुधा चिन्तितवन्तः। न्यायवैशेषिकदर्शने ज्ञानापरपर्याया च सा संविद् द्विविधा प्रोक्ता - स्मृतिरनुभवश्चेति। न्यायदर्शनेन तत्त्वसाक्षात्कारायापवर्गलाभाय च ज्ञानापरपर्यायायास्तस्याः संविदः साधनत्वं प्रतिपाद्यते। अस्मिन् सन्दर्भे संविदो भेदत्वात् स्मृतिर्मुख्यो विषयः। नैयायिकमतेऽनुभवत्वं प्रमात्वस्यानिवार्यं लक्षणम्। रामानुजदर्शने (विशिष्टाद्वैतवेदान्ते) स्मृतिरपि प्रमात्वेनाङ्गीकृतास्ति। तत्रानुभवव्यतिरिक्तं स्मृतिरिति यज्ज्ञानं वर्तते, तस्य दार्शनिकं स्वरूपम्, तत्प्रामाण्यम्, स्मृतिसमुत्पादिका प्रक्रिया चेतरदर्शनापेक्षया न्यायविशिष्टाद्वैतदर्शनयोर्भिन्नसरण्या विमृष्टा दृश्यन्ते। संस्कारमात्रजन्यं ज्ञानं स्मृतिरिति ह्युभयत्र समाने सामान्यलक्षणे सत्यपि तस्याः प्रमात्वविषये महद्वैमत्यं वर्तते। नैयायिकवैशेषिकैस्तु यथार्थानुभवस्यैव प्रमात्वम्, स्मृतिस्तु पूर्वज्ञानजन्यत्वात्, अर्थाजन्यत्वाच्चाऽप्रमाणकोटौ स्थापिता। अपरत्र विशिष्टाद्वैतदर्शने यथार्थं सर्वविज्ञानमिति सिद्धान्तमनुसृत्य स्मृतेरपि प्रामाण्यं सुदृढं स्थापितम्। स्मृतेः प्रामाण्यं किमर्थं नेष्यते नैयायिकैः? विशिष्टाद्वैतसिद्धान्ते च स्मृतेः प्रमारूपत्वं कथं सिध्यति ? इति समस्यानिदर्शनपूर्वकमुभयोर्दर्शनयोस्तुलनात्मकचिन्तन पुरस्सरं स्मृतेर्वास्तविकस्वरूपनिर्धारणमेवात्र लेखस्य मुख्यं लक्ष्यं वर्तते। अत्र सैद्धान्तिकाधारत्वेन न्यायवैशेषिकदर्शनसम्बद्धाः सूत्रभाष्यादिग्रन्थाः तथैव विशिष्टाद्वैतदर्शनसम्बद्धा यतीन्द्रमतदीपिका-

* उपप्राध्यापकः, प्राचीनन्यायविषयः, वाल्मीकिविद्यापीठः।

तत्त्वमुक्ताकलापादयो ग्रन्थाः स्वीकृताः सन्ति। प्रामणिकग्रन्थानां पाठालोडनपूर्वकं तुलनात्मक-वस्तुपरक-विश्लेषणात्मकशोधविधिरत्रानुसृता वर्तते। न्यायदर्शनस्य तथा विशिष्टाद्वैतदर्शनस्य सन्दर्भे स्मृतेः स्वरूपम्, तस्या लक्षणम्, तत्प्रामाण्यम्, तथा च मोक्षसाधने तस्या भूमिकायाः सविस्तरमालोडनं विधाय तन्निष्कर्षोऽत्र स्थापितः । अनेनानुसन्धानात्मकलेखेन न्यायविशिष्टाद्वैतयोः स्मृतिविषयकमतभेदस्यापि स्पष्टत्वं बोधगम्यत्वञ्चाधिकं भवेदिति दृढो विश्वासः।

**शब्दकुञ्जी :** संवित्, संस्कारः, प्रमा, अप्रमा, ध्रुवानुस्मृतिः।

## विषयपरिचयः

प्राच्यदर्शनेषु मोक्षस्यैव परमपुरुषार्थत्वेनोद्घोषात् तदवाप्तये तत्त्वज्ञानस्यानिवार्यता सर्वतन्त्रसिद्धा वर्तते। "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" (श्वेता.उ. ३।८) इति श्रुतिप्रमाणेन बन्धविमोक्षयोर्मूलं ज्ञानमेवेति सिद्ध्यति। न्यायदर्शने "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयव तर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" (न्या. सू.१।१।१) इति सूत्रयता गौतमेन प्रमाणादिषोडशपदार्थानां यथार्थबोध एव मोक्षहेतुत्वेन स्वीकृतः। तच्च ज्ञानं द्विप्रकारकं भवति- स्मृतिरनुभवश्चेति। यद्यपि लौकिकव्यवहारे स्मृतेरपरिहार्यत्वं प्रतिपदमङ्गीक्रियते, तथापि दार्शनिकानां तस्याः प्रामाण्यविषये महती विप्रतिपत्तिः, गम्भीरश्च मतभेदो दरीदृश्यते।

"मानाधीना मेयसिद्धिः" इति सिद्धान्तानुसारं यस्य कस्यापि प्रमेयपदार्थस्य यथार्थनिश्चयः प्रमाणव्यापारमन्तरेण न सम्भवति। अतो निखिलास्तिक-नास्तिकदर्शनेषु ज्ञानस्य स्वरूप-साधन-प्रामाण्यानां निर्णेतुं गभीरा विचाराः प्रवृत्ताः सन्ति । तत्र ज्ञानान्तर्गततया स्मृतेर्वैलक्ष्यण्यं प्रतिपाद्यते प्राच्यदार्शनिकैः तेषु तेषु दर्शनेषु, या च "स्मृतं मया", "तदेवेदम्" इत्यादिप्रतीतिरूपेण सर्वैरपि लोकव्यवहारिभिः प्रयुज्यते। यद्यपि सर्वे दार्शनिकाः स्मृतिं ज्ञानविशेषत्वेनाङ्गीकुर्वन्ति, तथापि तस्याः प्रमात्वविषये महान् विसंवादः परिदृश्यते। विशेषतस्तु तर्कप्रधानं न्यायदर्शनम्, पदार्थप्रधानं वैशेषिकदर्शनम्, तथा च भक्तिप्रधानं विशिष्टाद्वैतवेदान्तदर्शनमित्येतेषु दर्शनेषु स्मृतिस्वरूपमधिकृत्य महती चर्चा विहितास्ति।

न्यायदर्शने स्मृतिः प्रमा इति संज्ञया न व्यवह्रियते। तत्र प्रमात्वं केवलं यथार्थानुभवाश्रितमस्ति। नैयायिकानां मते स्मृतिस्तु संस्कारमात्रजन्या, अत एव सा पूर्वानुभवाधीना सती स्वतन्त्रा न भवति। धारावाहिकज्ञानस्य प्रमात्वमङ्गीकुर्वन्तोऽपि नैयायिकाः स्मृतिं गृहीतग्राहित्वादथवाऽनुभवभिन्नत्वात् प्रमाकोटौ न निवेशयन्ति। प्रशस्तपादभाष्येऽपि "अविद्या संशयो विपर्ययोऽनध्यवसायः स्वप्नश्च, विद्या प्रत्यक्षलैङ्गिकस्मृत्यार्षलक्षणः" (प्रशस्तपादः, २०७८: पृ.२६६) इति विभागे स्मृतिं विद्यात्वेनाङ्गीकृत्यापि तस्याः प्रामाण्यं पूर्वानुभवस्य यथार्थत्वे ह्येव समाश्रितं भवतीति प्रत्यपादि।

अपरत्र भगवद्रामानुजाचार्येण व्यवस्थितं वेदान्तदेशिकेन च परिवर्धितं न्यायपरिशुद्धितत्त्वमुक्ताकलापादिग्रन्थेषु समर्थितं च विशिष्टाद्वैतवेदान्तदर्शनं यदि स्मृतिर्यथार्थविषयिणी तर्हि सा प्रमेति प्रतिपादयति। अस्य वैलक्षण्यस्य मूलं मोक्षसाधनस्य स्वरूपविषये निहितमस्ति। न्यायमते तत्त्वसाक्षात्कारो मोक्षसाधनम्, अतः तत्र प्रत्यक्षानुभवादिनां प्राधान्यम्। किन्तु विशिष्टाद्वैतमते ध्रुवानुस्मृतिरूपा भक्तिः परमं साध्यम्।

"स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः" (छा.उ.७।२६।२) इति श्रुतिमाश्रित्य रामानुजाचार्येण प्रतिपादितं यत् स्मृतिः साक्षात् परब्रह्मप्राप्तेः सोपानभूतास्ति। यदि स्मृतिः प्रमा न स्यात्, तर्हि भगवदुपासनारूपायाः स्मृतेरप्यप्रमात्वप्रसङ्गे मोक्षशास्त्रस्यैवाप्रामाण्यं स्यात्।

अत एव वेदान्तदेशिकेन "यथार्थं सर्वं विज्ञानम्" (रामानुजः, १९९५: पृ.७०) इति सिद्धान्तमनुसृत्य स्मृतेः स्वतन्त्रं प्रामाण्यं व्यवस्थापितम्। तेषां मतेऽनुभववदेव स्मृतिरप्यर्थपरिविच्छित्तिरूपा भवति। एवं च नैयायिकानां "संस्कारमात्रजन्यत्वम्" इति लक्षणं दूषयित्वा विशिष्टाद्वैतिनः स्मृतिं ज्ञानस्य तादृशं भेदं मन्वन्ते, यश्चात्मनो धर्मभूतज्ञानस्यैव विकासविशेषः।

स्मृतिस्वरूपमादाय प्राच्यदर्शनेषु क्वचिदांशिकतया क्वचिच्च व्यापकतया चर्चा समुपलभ्यते। परन्तु न्यायदर्शनोक्तस्मृतिस्वरूपेण सह विशिष्टाद्वैतदर्शनप्रोक्तस्मृतिस्वरूपस्य तुलनात्मकतयाध्ययनं तच्चिन्तनं वा इतः पूर्वं कार्त्स्न्येन जातमिति न प्रायेण दृग्गोचरीभूतम् । अतोऽस्मिन्नालेखे ह्युपर्युक्तयोरुभयोर्दर्शनयोस्तुलनात्मकतया चिन्तनं विधाय स्मृतिस्वरूपनिर्धारणपूर्वकं तद्वैलक्षण्यप्रतिपादनञ्च विधीयते। अनेन स्मृतिविषयकाऽलेखेनोपर्युक्तस्य शोधान्तरालस्य पूर्तिर्भवेदित्याशयेन न्यायवैशेषिकदिशा तथैव विशिष्टाद्वैतदर्शनदृशा च स्मृतेः स्वरूपं तद्भेदाः तस्याः प्रमात्वाप्रमात्वविषयः सहेतुकं विश्लिष्यते। न्यायविशिष्टाद्वैतदर्शनाभिमतस्मृतिविषयालोडनक्रमे प्रामुख्येन इयं समस्या दृष्टा-

क.न्यायविशिष्टाद्वैतदर्शनयोः स्मृतेः किं वैलक्ष्यण्यम् ?

उपर्युक्तसमस्यासमाधानमेवास्यालेखस्य मुख्यमुद्देश्यमस्ति। तद्यथा-

क. न्यायविशिष्टाद्वैतदर्शनयोः स्मृतेर्वैलक्ष्यण्योपपादनम्।

प्रस्तुतस्यालेखस्य सीमा न्यायविशिष्टाद्वैतयोः स्मृतिविषयक-मतभेद-पर्यन्ताः, विशेषतः स्मृतेः प्रामाण्याप्रामाण्य-विमर्श-पर्यन्ता च निर्धारिता वर्तन्ते।

## अध्ययनविधिः

अस्य शोधलेखस्य निर्वाहार्थं पुस्तकालयीयाध्ययनविधेः साहाय्यं गृहीतमस्ति। लेखस्य सज्जीकरणार्थं प्राथमिकसामग्रीत्वेन न्यायसूत्रभाष्य-प्रशस्तपादभाष्य-न्यायकुसुमाञ्जलियतीन्द्रमतदीपिका-तत्त्वमुक्ता-कलापादयः मूलग्रन्थाः गृहीताः सन्ति। द्वितीयकसामग्रीत्वेन आधुनिकविद्वद्भिः लिखिताः समीक्षात्मकाः ग्रन्थाः, शोधपत्राणि, अन्तर्जालमाध्यमेनोपलब्धाः स्मृतिसम्बद्धाः प्रामाणिका विषयाः स्वीकृताः सन्ति ।

स्मृतितत्त्वस्य निगूढार्थप्रकटनाय अत्र समीक्षात्मक-विश्लेषणविधिः अनुसृतः। न केवलं ग्रन्थानां पङ्क्तीनामुद्धरणं, अपितु उद्देश-लक्षण-परीक्षा इति शास्त्रीयपद्धत्या स्मृतेः स्वरूपपरीक्षणं विहितम्। विषयस्य दृढीकरणाय आगमन-निगमनविध्योः समुचितः प्रयोगो विहितः। यत्र अनुभवात् संस्कारोत्पत्तिं प्रति सामान्यनियमः स्थाप्यते, तत्र आगमनविधिः; यत्र च 'यथार्थं ज्ञानं प्रमा' इति सामान्यनियमात् 'स्मृतिः प्रमा' इति विशेषनिश्चयः क्रियते, तत्र निगमनविधेराश्रयो गृहीतः । तथैव विविधटीकाग्रन्थेषु उपलब्धानां विचाराणां पौर्वापर्यं संवीक्ष्य न्यायविशिष्टाद्वैतयोः स्मृतिविषयकविरोधपरिहारे समीक्षणात्मको विधिरवलम्बितः।

## सैद्धान्तिकपर्याधारः

प्रस्तुतस्य न्यायविशिष्टाद्वैतदर्शनोक्तस्मृतिविषयकालेखस्य सैद्धान्तिकपर्याधारो मुख्यरूपेण न्यायदर्शनस्य स्मृतिसिद्धान्तः तथा विशिष्टाद्वैतदर्शनस्य धर्मभूतज्ञानसिद्धान्तानुरूपं वर्तते। न्यायदर्शने स्मृतेः संस्कारमात्रजन्यत्वरूपः सिद्धान्तः तथा च विशिष्टाद्वैते यथार्थं सर्वविज्ञानम् इति सत्ख्यातिवादः सैद्धान्तिकाधारत्वेनत्वेनात्र स्वीकृतः।

## स्मृतिस्वरूपविश्लेषणम्

प्राच्यदर्शनपरम्परायां वैशेषिकदर्शनं पदार्थप्रधानम्, न्यायदर्शनञ्च प्रमाणप्रधानं वर्तते। अनयोर्दर्शनयोः बुद्धेः (ज्ञानस्य) गुणपदार्थेऽन्तर्भावो विहितः। तत्र ज्ञानं द्विविधं भवति-स्मृतिरनुभवश्च। "संस्कारमात्रजन्यं ज्ञानं स्मृतिः" (भट्टः, १९८५: पृ.२१)इति स्मृतेः लक्षणं तार्किकैरुद्घोषितम्। अत्र मात्रपदेन प्रत्यभिज्ञाया व्यावृत्तिः क्रियते, यतो हि प्रत्यभिज्ञा संस्कारजन्या सत्यपि इन्द्रियसन्निकर्षमप्यपेक्षते, परन्तु स्मृतिस्तु केवलं संस्कारादेव समुद्भवति।

वैशेषिकदर्शने प्रशस्तपादभाष्ये स्मृतिं निरूपयताचार्येण प्रतिपादितं यदात्ममनसोः संयोगेन, पूर्वानुभवजनितसंस्कारेण, तथा च प्रणिधानादि-उद्बोधककारणैः स्मृतिरुत्पद्यते। वैशेषिकसूत्रकारेण- "आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः" (वै.सू. ९।२।६) इति सूत्रेण स्मृतेः स्वरूपं व्याख्यातम्। अस्यार्थः-आत्ममनसोर्विशिष्टसंयोगाद् भावनाख्यसंस्काराच्च स्मृतेरुत्पत्तिर्भवतीति। यद्यपि सूत्रे आत्ममनसोः संयोगः स्मृतेः कारणत्वेन निर्दिष्टः, तथापि संस्काराभावे स्मृतिर्न भवतीति सूचना सूत्रेणैव लभ्यते। प्रशस्तपादभाष्येऽपि सूत्रोक्तयोरात्ममनःसंयोग-संस्कारयोर्व्याख्यानं विहितमस्ति। भाष्ये संस्कारस्य विशेषणत्वेन "पट्वाभ्यासादरप्रत्ययजः" (प्रशस्तपादः, २०७८: पृ.२६६) इति पदं प्रयुक्तम्। तदतिरिच्यात्ममनसोः संयोगेन स्मृतिजननाय लिङ्गदर्शन-इच्छा-अनुस्मरणादीनामपेक्षा क्रियत इति स्पष्टं प्रतिपादितम् । स्मृतिरप्येकं ज्ञानमेव, अतः तदर्थमात्ममनसोः संयोगस्त्वनिवार्य एव। किन्तु यस्य वस्तुनः स्मृतिरपेक्षिता, तस्य स्मारकस्य कस्यचित् सङ्केतस्य (लिङ्गस्य) बोधोऽप्यावश्यकः। तेन साकं स्मर्तव्यविषयिकेच्छा, पुनः पुनरनुस्मरणं चापेक्ष्यते। फलत एतेषां साहाय्येनैव आत्ममनःसंयोगः स्मृतिं जनयति। स्मृतिं प्रति यद्यपि संस्कारोऽपि कारणम्, आत्ममनःसंयोगः स्मृतिप्रसवेऽनिवार्यतया संस्कारस्य साहाय्यं गृह्णाति। किन्त्वन्येभ्यः कारणेभ्यः संस्कारस्य महती भूमिका वर्तते, अत एव सूत्रकारेण आत्ममनःसंयोगेन सह संस्कारस्य पृथक् ग्रहणं विहितम्। "आत्ममनसोः संयोगविशेषात् संस्काराच्च स्मृतिः" (वै.सू. ९।२।६) इति सूत्रव्याख्याने श्रीशङ्करमिश्रः कथयति-

"एतस्मादसमवायिकारणादात्मनि समवायिनि स्मृतिर्विद्याविशेष उत्पद्यते। निमित्तकारणमाह- संस्कारादिति" (मिश्रः,१९६९:पृ.५१२)। सूत्रेऽन्येषां कारणानामनुल्लेखेऽपि संस्कारस्योल्लेखः तस्य वैशिष्ट्यं सूचयति। तथापि लिङ्गदर्शनादीन्यपि निमित्तकारणान्येवेति-"लिङ्गदर्शनवत् संस्कारोऽपि स्मृतेर्निमित्तकारणमिति" (भट्टः,१९९७ : पृ.६२५) इति श्रीधराचार्यस्य कथनेन पुष्यति। यद्यपि एतद्वाक्यं संस्का**रं** निमित्तकारणत्वेन स्वीकरोति, तथापि लिङ्गदर्शनमेवेति कथनेन लिङ्गदर्शनस्य

भावनाख्यनिमित्तकारणत्वं स्पष्टीभवति। सूत्रे संस्कारोत्पत्तिप्रक्रियायाः साक्षादुल्लेखो नास्ति, तथापि भाष्ये संस्कारविश्लेषणप्रसङ्गे तस्य विवरणं वाञ्छनीयं वर्तते।

अत्र प्रत्ययशब्दस्य प्रत्येकपदेन सह सम्बन्धः करणीयः। अर्थात्- पटुप्रत्ययात्, अभ्यासप्रत्ययात्, आदरप्रत्ययाच्च संस्कारो जायते।

पटुप्रत्ययः- यत्रात्यन्तोत्साहेनाश्चर्यजनकेन वा ज्ञानेन (स्फुटतरप्रत्ययेन) संस्कारो जायते, सः पटुसंस्कारः। ईदृशः संस्कारः- सुदृढः चिरस्थायी च भवति।

अभ्यासः - व्योमशिवाचार्यमते- *"पूर्वपूर्वसंस्कारापेक्षो हि उत्तरोत्तरप्रत्ययोऽभ्यासः"(व्योमशिवाचार्यः, १९८४: पृ.२२७)।* अर्थात् कस्यचित् विषयस्य पुनः पुनः ग्रहणमेवाभ्यासः, यः संस्कारं द्रढयति।

आदरप्रत्ययः - अत्रादर इत्यस्यार्थोऽतिशयप्रयत्नः। यदा वयं कञ्चन विषयं सोत्सुकं पश्यामः, तदा तस्मादादरप्रत्ययात् बलवान् संस्कार उत्पद्यते।

सूत्रे भाष्ये च केवलं संयोगः'" इत्यनुक्त्वा संयोगविशेष इति पदं प्रयुक्तम्। अस्य तात्पर्यमस्ति यत् सामान्यसंयोगमात्रेण स्मृतिर्न जायते। श्रीधरभट्टस्य मते- *"आत्ममनःसंयोगस्य च लिङ्गदर्शनादिसहकारितैव विशेषः"*। अर्थाद् लिङ्गदर्शनादीनां सहकारित्वमेवात्रविशेषपदेन लक्ष्यते। भाष्ये लिङ्गदर्शनेच्छानुस्मर णादीत्यत्रादिपदं प्रयुक्तम्। व्योमशिवाचार्य-श्रीधरभट्टमते आदिशब्देन न्यायसूत्रोक्तानां प्रणिधानादीनां सप्तविंशति (२७) निमित्तानां ग्रहणं भवति।

न्यायसूत्रानुसारं स्मृतेः निमित्तानि यथा:

"प्रणिधान-निबन्ध-अभ्यास-लिङ्ग-लक्षण-सादृश्य-परिग्रह-आश्रय-आश्रित-सम्बन्ध-आनन्तर्य-वियोग-एककार्य-विरोध-अतिशय-प्राप्ति-व्यवधान-सुख-दुःख-इच्छा-द्वेष-भय-अर्थित्व-क्रिया-राग-धर्माधर्मनिमित्तेभ्यः" (न्या.सू. ३।२।४१) इति। तथा च कस्यचित् वस्तुनः स्मरणेच्छया मनस एकाग्रतां विधाय स्मृतेः कारणभूतस्य विषयस्य यच्चिन्तनं क्रियते, तदेव "प्रणिधानम्" इत्युच्यते। किं-स्वभावकानां विषयाणां स्मृतिर्भवति इति जिज्ञासायं भाष्यकारेण "दृष्टश्रुतानुभूतेष्वर्थेषु" (प्रशस्तपादः, २०७८: पृ.३४९) इत्युक्तम्। यद्यपि पूर्वज्ञातस्यैव विषयस्य स्मृतिर्भवतीति सामान्यजनैरपि ज्ञायते, तथापि केन प्रमाणेनोपलब्धस्य विषयस्य स्मरणं जायत इति स्पष्टयितुं भाष्यकारेणैतदुक्तम्। अस्य तात्पर्यमस्ति यत् प्रत्यक्ष-शब्द-अनुमानप्रमाणैर्गृहीतानां विषयाणामेव स्मृतिर्भवति।

दृष्टेषु- प्रत्यक्षीकृतेषु विषयेषु।
श्रुतेषु- शब्दावगतेषु (आप्तवाक्यजनितेषु) विषयेषु।
अनुभूतेषु- अनुमितेषु विषयेषु।

**स्मृतेः कार्याणि**

स्मृतेः प्रक्रियायाः विषयविवेचनस्यानन्तरं भाष्यकारः "शेषानुव्यवसायेच्छानुस्मरणद्वेषहेतुः" (तत्रैव ) इति सन्दर्भमादाय स्मृतेः प्रयोजनं कार्यं वा स्पष्टयति। अत्र शेष इत्यस्य अर्थोऽनुमेयज्ञानम् (साध्यज्ञानम्), "अनुव्यवसाय" इत्यस्य अर्थः पश्चाज्जायमानं ज्ञानम्। प्रथमं व्याप्तिस्मरणं भवति, तदनन्तरं साध्यस्य

अनुमितिर्जायते। अतः स्मृतिरनुमितेः कारणम्। यथोक्तं कन्दल्याम्- *"प्रथमोपजातलिङ्गज्ञानापेक्षया तदनन्तर्भाव्यनुमेयज्ञानम्, तस्य हेतुर्व्याप्तिस्मरणम्"* (भट्टः,१९९७ : पृ.६२६)। यद्यपि श्रीधरभट्टेन परामर्शस्य साक्षादुल्लेखो न कृतः, तथापि परामर्शोऽपि व्याप्तिस्मरणस्यैव कार्यं भवितुमर्हति। यदा कस्यचित् वस्तुनः स्मरणं भवति, तदा यदि तत् वस्तु पूर्वं सुखकरमासीत्, तर्हि तस्य सुखस्यापि स्मरणं जायते। तस्मात् सुखात्मकस्मृतेः कारणात् तद्वस्तु प्राप्तुमिच्छोत्पद्यते। एतद्विपरीततया यदि तस्माद् वस्तुनः पूर्वं दुःखमनुभूतं, तर्हि तस्मिन् विषये द्वेष उत्पद्यते। एका स्मृतिरन्यासां स्मृतीनां शृङ्खलां जनयति, अतः स्मृतिरनुस्मरणस्यापि कारणं भवति।

यद्यपि वैशेषिकमते स्मृतिर्विद्यास्ति, तथापि सा प्रमात्वेन न स्वीक्रियते। प्रमायाः कृते विद्यात्वमनिवार्यम्, किन्तु विद्यात्वस्य कृते प्रमात्वमनिवार्यं नास्ति। अर्थात् यत्किञ्चित् यथार्थज्ञानं विद्येति कथ्यते, किन्तु यथार्थानुभवमात्रं प्रमा भवति। स्मृतिरपि यथार्थज्ञानं भवितुमर्हति, परन्तु सा यथार्थ-अनुभवो न, यतः स्मृतेराधारः पूर्वज्ञानमेव भवति।

प्रमा इत्यस्य व्युत्पत्त्यर्थानुसारेण प्रमां प्रति प्रमाणस्यानिवार्यता सिद्ध्यति। किन्तु स्मृत्यादीनां कृते प्रमाणस्यानिवार्यता न विद्यते। यथोक्तं मिश्रेण - प्रमायाः साधनं प्रमाणं भवति, स्मृतेस्तु साधनं प्रमाणं न, अपि तु संस्कार एव (१९६८ : पृ.१९६)। स्मृतेः बीजं संस्कारोऽस्ति, यश्च भावनापदेन व्यपदिश्यते। यदा कश्चन पुरुषः किमपि वस्तु पश्यति, तदा तस्यात्मनि एकः सूक्ष्मः संस्कारो निविशते। स च संस्कारः सदृशवस्तुदर्शनेन, चिन्तनेन, अदृष्टवशाद्वा यदा प्रबुद्धो भवति, तदा स्मृतिरूपेण संवित् परिणमते।

उदयनाचार्येण न्यायकुसुमाञ्जलिग्रन्थे स्मृतेः प्रक्रिया (उदयनाचार्यः, २००५: पृ.१५६) निर्दिष्टा। तन्मते स्मृतिः साक्षादर्थजन्या न भूत्वा परम्परयार्थसम्बद्धा भवति। पूर्वानुभवः स्वसमानविषयिणि संस्कारं जनयति, स च संस्कारः स्वाश्रयभूते आत्मनि स्थिरीभूय समयविशेषे स्मृतिमार्गेणार्थं प्रकाशयति। अत्रेदं विज्ञेयम् यत् स्मृतेर्विषयः स एव भवति, यः पूर्वानुभवस्य विषय आसीत्। अननुभूतार्थस्य स्मृतिः कदापि न सम्भवति, यतो हि तत्र बीजभूतस्य संस्कारस्याभावो वर्तते।

न्यायवैशेषिकसिद्धान्ते स्मृतिः न केवलं लौकिकव्यवहारोपयोगिनी, अपितु प्रत्यभिज्ञा-प्रत्यक्षस्यापि आधारभूता मन्यते। यद्यपि इयं स्मृतिरनुभवपरतन्त्रा वर्तते, तथापि व्यवहारे अस्याः स्थानं निराबाधम्।

**न्यायवैशेषिके स्मृतेः प्रमाऽप्रमात्वविमर्शः**

न्यायवैशेषिकदर्शने ज्ञानस्य प्रामाण्यनिश्चयप्रसङ्गे स्मृतेः स्थानमधिकृत्य महान् विचारः प्रसृतो वर्तते। अत्र तार्किकाः स्मृतिं प्रमाकोटौ न निवेषयन्ति, अपितु तां प्रमाबहिर्भूतां ज्ञानविशेषरूपेणैवोद्घोषयन्ति। नैयायिकानां मते "यथार्थानुभवः प्रमा" (मिश्रः,२००३: पृ१४) इति लक्षणमङ्गीक्रियते। अस्मिन् लक्षणेऽनुभवपदस्य सन्निवेशः स्मृतेः प्रमात्वं व्यावर्तयति। स्मृतेरप्रामाण्ये तार्किकैः केचन प्रबला हेतवः समुत्थाप्यन्ते। तत्र प्रथमस्तावदर्थाजन्यत्वम्। यथार्थानुभवोऽर्थेन साक्षाद् जन्यते, येन तस्यार्थाव्यभिचारित्वं सिध्यति। स्मृतिस्त्वर्थादुत्पद्यमाना न भवति, सा तु केवलं पूर्वानुभवजनितसंस्कारमात्रमवलम्बते। अतः साक्षादर्थसम्बन्धाभावात् स्मृतिः न प्रमारूपतां भजते। अपि च, गृहीतग्राहित्वञ्च स्मृतेरपरा न्यूनता। यत्

पूर्वमेव ज्ञातम्, तस्यैव पुनः प्रकाशनं कुर्वती स्मृतिरनधिगतार्थप्रकाशिका न भवति। यद्यपि नैयायिका अनधिगतत्वं न लक्षणे निवेशयन्ति, तथाप्यनुभवत्वस्य प्राधान्यात् स्मृतिः प्रमान्तर्गता न भवति।

अत्र उदयनाचार्यो न्यायकुसुमाञ्जलावकथत्- "स्मृतेजनकानुभवसमानविषयकतया तत्प्रामाण्याधीन-प्रामाण्यकतया सापेक्षत्वात् तत्र न प्रमा व्यवहारः" (उदयनाचार्यः, २००५: पृ.१५६) इति। अर्थात् स्मृतिः पूर्वानुभवाधीना वर्तते। यद्यनुभवो यथार्थः, तर्हि स्मृतिरपि यथार्था, यदि च अनुभवो भ्रमरूपः, तर्हि स्मृतिरप्ययथार्था। एवं स्वतोऽनिश्चितप्रामाण्या सा परमुखनिरीक्षिणी संवित् कथं स्वतन्त्रं प्रमात्वं विन्देत ? संस्काराणामतीन्द्रियत्वेन तेषां व्यापारोऽपि साक्षात् न दृश्यते, अतः स्मृतेः याथार्थ्यमनुभवगतयाथार्थ्यमेवा नुसरति।

किञ्च, वैशेषिकप्रवरः प्रशस्तपादोऽपि स्मृतेरविद्यायां (अप्रमायां) समावेशं न कृतवान्, नापि विद्यायां (प्रमायाम्)। तन्मते स्मृतिः पृथग्रूपेणैव विमृश्यते। नैयायिकाः स्मृतिं भ्रमत्वेन न निन्दन्ति, अपित्वप्रमापदेन संवेदयन्ति। यथार्थस्मृतिः व्यवहारे संवादं जनयति, पिपासाशान्तये जलस्मरणं सफलप्रवृत्तये कल्पते, तथापि शास्त्रीय-प्रमालक्षणस्यातिक्रमात् सा प्रमापदवाच्या न भवति। एवं न्यायवैशेषिकदर्शने स्मृतेः स्थितिः प्रमा-बहिर्भूता यथार्था संविदिति रूपेण स्थिरीकृता वर्तते, या खलु केवलं व्यवहारमात्रे पर्यवस्यति।

**विशिष्टाद्वैतदर्शनोक्तस्मृतिस्वरूपम्**

विशिष्टाद्वैतवेदान्तस्य ज्ञानमीमांसायां बुद्धेः स्वरूपं न केवलं गुणत्वेन, अपितु द्रव्यत्वेनापि समुल्लसति। अत्र ज्ञानं धर्मभूतज्ञानपदेन (श्रीनिवासः, २०७७: पृ.१५२) व्यपदिश्यते, यच्च स्वभावतो विभु, नित्यं, द्रव्यरूपञ्च वर्तते। अस्यैव विभुज्ञानस्य अवस्थाविशेषत्वेन 'स्मृतिरङ्गीक्रियते। विशिष्टाद्वैतदर्शनस्य प्रबलपण्डितो वेदान्तदेशिकः 'तत्त्वमुक्ताकलापे' स्मृतेः लक्षणं परिष्कुर्वन् प्रोवाच यत्- "अर्थे पूर्वानुभूते संस्कारानुग्रहे या परिणमति मतिः सा स्मृतिः" (देशिकः २००४: पृ.६७७) इति। अत्र परिणमतीति क्रियापदेन इदमभिप्रेतं यत् धर्मभूतज्ञानमेव संस्कारसाचिव्येन स्मृतिरूपेण विकारं भजते।

अस्मिन् दर्शने स्मृतेः स्वरूपं न्यायमतात् सर्वथा भिद्यते। न्यायमते स्मृतिः केवलं संस्कारमात्रजन्या, परं विशिष्टाद्वैते इयं संवित्-प्रकारत्वेन स्वीक्रियते। यदा जीवात्मा पूर्वानुभूतं वस्तु स्मर्तुमिच्छति, तदा तदीयं धर्मभूतज्ञानं हृदयदेशात् निर्गत्य संस्कारोद्बोधकसहकारेणातीतमर्थं प्रकाशयति। संस्काराणाम् उद्बोधे च "सह-मित-सदृश-ख्याति-अदृष्टप्रभेदाः" (देशिकः २००४: पृ.६७७)साहाय्यं कुर्वन्ति। अत्रादृष्टपदं विशेषतोऽवधेयम्, यतो हि धर्माधर्मविव स्मृतेः समयमसमयञ्च नियच्छतः। यदा भोजनादानपेक्षितवस्तुनः स्मृतिः जायते, तत्राधर्मो हेतुः, यदा च समये उचितवस्तुस्मरणं भवति, तत्र धर्मः कारणत्वेन कल्प्यते।

विशिष्टाद्वैतमते स्मृतेः स्वरूपं त्रैकालिकत्वेनापि विमृश्यते। यद्यपि स्मृतिरतीतमर्थमवगमयति, तथापि साऽर्थशून्या न भवति। 'बाह्यशून्या न चैषा' (देशिकः २००४: पृ.६७७) इति वचनात् स्मृतेः बाह्यार्थविषयकत्वं स्पष्टतया ज्ञायते। यदि स्मृतिरर्थशून्या स्यात्, तर्हि स्मृत्यनन्तरं जायमाना व्यवहाररूपाऽर्थक्रिया सर्वथा विसंवादिनी भवेत्। परं लोके जलस्मरणानन्तरं जलप्राप्तिरपि भवति, अतः स्मृतेरर्थसम्बद्धत्वं निराबाधम्।

अपि चास्मिन् सिद्धान्ते प्रत्यभिज्ञा संस्कारजन्यत्वेऽपि स्मृतिविलक्षणरूपेण निरूप्यते। प्रत्यभिज्ञायां तत्ता

(स्मृतिः) 'इदन्ता' (प्रत्यक्षम्) इति द्वयोः सङ्करो भवति, परं स्मृतिस्तु केवलं संस्कारमात्रप्रयोज्या वर्तते। अत एतन्मते मुमुक्षोर्ब्रह्मसाक्षात्काराय ध्रुवानुस्मृतिर्द्वारभूता संविदस्ति। एवं विशिष्टाद्वैतदर्शने स्मृतिरात्मनो धर्मभूतज्ञानस्य सा चिकीर्षा-प्रयत्नादि-अवस्थावदेवैका यथार्था परिणतिर्वर्तते, या खल्वर्थप्रकाशकत्वधर्मेण सर्वदा समन्विता भवति।

**स्मृतेः प्रमात्वव्यवस्थापनम्**

विशिष्टाद्वैतदर्शने स्मृतेः प्रमात्वसमर्थनसिद्धान्तेन नैयायिकमीमांसकादि-दार्शनिकसम्प्रदायाः विशीर्यन्ते । अस्मिन् सिद्धान्ते 'यथार्थं सर्वविज्ञानम्'इति मूलमन्त्रमवलम्ब्य स्मृतेर्याथार्थ्यमुक्तम्। नैयायिकाः 'यथार्थानुभवः प्रमा' इति वदन्तः स्मृतेरनुभवभिन्नत्वात् प्रमात्वं व्यासेधन्ति। यद्यपि नैयायिकमतेऽपि यथार्थानुभवजन्या स्मृतिर्यथार्था तथाऽयथार्थानुभवजन्या चायथार्था भवति तथापि तस्यानुभवकोटौ समावेशो न विधीयते। अत आह- अनुभवो नाम स्मृतिव्यतिरिक्तं ज्ञानम् (मिश्रः, २००३: पृ१४) इति। परन्तु विशिष्टाद्वैतिन एनं व्यासेधं नाङ्गीकुर्वन्ति। तेषामयमाशयः यद्यदि ज्ञानं यथावस्थितवस्तुप्रकाशकं तर्हि तस्य प्रमात्वं केन वार्येत ?

स्मृतेः प्रामाण्यसमर्थने 'याथार्थ्यं पारतन्त्र्यात् न च गलति' (देशिकः २००४: पृ.६७९) इति हेतुरतीव प्रबलो वर्तते। यथा अनुमानं व्याप्तिज्ञानाधीनत्वात् प्रत्यक्षपरतन्त्रं सत् प्रमात्वं भजते, तथा स्मृतिरपि पूर्वानुभवाधीनत्वात् कथं न प्रमा स्यात्? पारतन्त्र्यं नाप्रामाण्ये बीजम्, अपितु विषयविसंवाद एवाप्रामाण्यप्रयोजकः। स्मृतौ तु विषयविसंवादाभावात् सा प्रमापदवाच्या भवति। नैयायिकोक्ता अर्थाजन्यत्वयुक्तिरपि अत्र विशीर्यते, यतो हि स्मृतिः परम्परया अर्थसम्बद्धा भवति। यदि स्मृतिरर्थशून्या स्यात्, तर्हि स्मृत्यनन्तरं प्रवर्तमानार्थक्रिया (यथा पिपासायां जलस्मरणानन्तरं तत्प्राप्तये प्रवृत्तिः) सर्वथा विफला भवेत्। लोके तु सा सफला दृश्यते, अतः स्मृतेः प्रमात्वं निर्विवादम्।

अपि च, मीमांसकोक्तमनधिगतार्थगन्तृत्वम् (अपूर्वविषयकत्वम्) प्रमालक्षणत्वेन विशिष्टाद्वैते नाङ्गीक्रियते। गृहीतग्राहित्वे' (पूर्वविदितस्य पुनः ज्ञाने) को दोषः? धारावाहिकज्ञानेऽप्युत्तरज्ञानं पूर्वगृहीतमेव गृह्णाति, तथापि तत् प्रमाणमिष्यते। एवं स्मृतावप्यनधिगतत्वाभावेऽपि याथार्थ्यस्य सत्त्वात् प्रमात्वं समुपपद्यते। स्मृतिः पूर्वानुभवमनुसरति, तर्हि तावता तस्याः स्वकीयं स्वरूपं न नश्यति। विशिष्टाद्वैतमते स्मृतेः प्रामाण्यं श्रुतिबलेनापि सिद्ध्यति। 'स्मृतिः प्रत्यक्षमैतिह्यम्' इति श्रुतिवाक्यम् स्मृतेः प्रत्यक्षवदेव प्रामाण्यं कण्ठरवेण घोषयति। यदि स्मृतिरप्रमा स्यात्, तर्हि मुनीनां धर्मशास्त्ररूपाः स्मृतयोऽपि अप्रमा भवेयुः, येनाखिलधर्मव्यवहारो विलुप्येत। अतः कालद्वयसम्बन्धिनि ज्ञाने विरोधाभावात् स्मृतेः याथार्थ्यं निर्विवादम्। इत्थं विशिष्टाद्वैतसिद्धिप्रक्रियायां स्मृतिः यथार्थसंविद्रूपेणार्थक्रियाकारित्वेन, श्रुतिसंमतत्वेन च प्रमारूपेण निश्चीयते।

**स्मृतिविषये श्रीभाष्यकारमतम्**

विशिष्टाद्वैतदर्शनस्य प्रतिष्ठापकाचार्यस्य श्रीरामानुजस्य मते ज्ञानस्य याथार्थ्यं न केवलं प्रत्यक्षानुमानादिषु, अपितु स्मृतावपि समानरूपेणानुप्रविशति। श्रीभाष्यकारः स्वकीये श्रीभाष्यग्रन्थे तथा च वेदान्तसारे

ज्ञानस्य यथार्थत्वं साधयन् स्मृतिं न कदापि प्रमाबहिर्भूतां मन्यते। तन्मते संवित्स्वभावस्य अविकार्यत्वात् स्मृतिरप्यर्थप्रकाशकत्वधर्मेण समन्विता तिष्ठति। श्रीभाष्ये जिज्ञासाधिकरणे सः स्पष्टमकथत् यत्- "यथार्थं सर्वविज्ञानम्" (रामानुजः, १९९५: पृ.७०) इति। अस्मिन् सिद्धान्ते स्मृतेरप्यन्तर्भावो वर्तते, यतो हि सापि पूर्वानुभूतं विषयमेव प्रकाशयति।

श्रीभाष्यकारस्य दृष्ट्या ज्ञानस्याप्रामाण्यं न तस्य स्वरूपे, अपितु विषयान्तरारोपे अथवा इन्द्रियदोषादिषु भवति। सः स्मृतिं 'प्रमा' इति तदा स्वीकरोति यदा सा स्वकीयं पूर्वानुभवं यथारूपेणानुसरति। "स्मृतिरपि पूर्वानुभूतविषयगोचरा" इति तस्य सिद्धान्तः। नैयायिकानां स्मृत्यप्रामाण्यवादं निराकुर्वन् सः प्रत्यपादयत् यत्- यदि स्मृतिः स्वविषये विसंवादिनी न भवति, तर्हि तस्याप्रमाणत्वं कल्पयितुं न शक्यते। यतीन्द्रमतदीपिकायामपि श्रीभाष्यकारमतमनुसृत्यैव स्मृतेः प्रमारूपत्वं सुदृढं व्यवस्थापितं वर्तते। अनुभव स्मृत्योर्विषयैक्येऽप्यनुभवस्य साक्षात्त्वं स्मृतेश्च पारोक्ष्यमिति विशेषः, न तु याथार्थ्यायाथार्थ्यकृतः। अनुभवः साक्षात् अर्थसम्बद्धः भवति, स्मृतिस्तु परम्परया (संस्कारद्वारा) अर्थसम्बद्धा, परं तावता स्मृतेः याथार्थ्यं न विहन्यते। सः प्रत्यभिज्ञायां स्मृतेरंशं स्वीकृत्य तस्याः प्रामाण्यं समर्थयति। यदि स्मृत्यंशोऽ प्रमाणं स्यात्, तर्हि प्रत्यभिज्ञापि प्रमाणं न भवेत्, अपि च, श्रीभाष्यकारः ध्यानोपासनादिशब्दवाच्यज्ञानस्वरूपनिरूप णावसरे स्मृतेः महिमानं चरमोत्कर्षेणोपस्थापयति। एतन्मते- "ध्यानं तैलधारावदविच्छिन्नस्मृतिसन्तानरू पम्" (रामानुजः,१९९५: पृ.८) । मोक्षोपायत्वेन ध्रुवानुस्मृतिरेव भक्तिशब्देनाभिधीयते (तत्रैव : पृ.९)। श्रीमद्रामानुजाचार्यः यदि स्मृतिरप्रमा स्यात्, तर्हि भगवद्गुणगणानुस्मरणरूपा भक्तिरप्यप्रमा भवेत्, तेन च मोक्षप्राप्तिरेवासम्भवा स्यात्। अतः सः स्मृतिं न केवलं व्यवहारे, अपितु पारमार्थिकमार्गेऽपि प्रमात्वेन प्रतिष्ठापयति। श्रीभाष्यकारमते स्मृतेः प्रमात्वं संवित्त्वाविशेषात्, अर्थक्रियाकारित्वात्, भक्तिसाधनत्वाच्च सर्वथा सिद्धं वर्तते। "आवृत्तिरसकृदुपदेशात्" (ब्र.सू. ४। १।१) इति सूत्रस्य व्याख्याने प्रतिपादयति यद् वेदान्तेषु विहिता उपासनाथवा ध्यानं नाम नान्यत्, अपि तु तैलधारावत् अविच्छिन्न-स्मृति-सन्तान एव। तथैव सेयं स्मृतिः दर्शनसमानाकारा (रामानुजः १९९५ : पृ.८) इति। अर्थात्, यदा स्मृतिरत्यन्तं दृढा, निरन्तरा च भवति, तदा प्रत्यक्षावभासो भवति। एतादृशी स्मृतिरेव ध्रुवानुस्मृतिरित्युच्यते। विशिष्टाद्वैतवेदान्तस्य परमरहस्यं स्मृतेः मोक्षसाधनत्वे प्रतिष्ठितं विद्यते। अत्र भक्तिर्न केवलं भावनात्मकं संवेदनम्, अपितु सा ध्रुवानुस्मृतिरिति शब्देन व्यपदिश्यते। मुमुक्षोः कृते इयं स्मृतिः न सामान्या, अपितु दर्शनसमानाकारा भवतीत्युक्तम्। यदा स्मृतिः प्रकर्षं गच्छति, तदा सा स्मृतिरपि प्रत्यक्षवदर्थावभासिका भवति । अस्यामेवावस्थायां भक्तो भगवन्तं चक्षुषा इव पश्यति। अत्रैव स्मृतेः प्रमात्वं चरमोत्कर्षं लभते। यदि स्मृतिरप्रमा स्यात्, तर्हि तथाविधया स्मृत्या जायमानः साक्षात्कारोऽपि भ्रमात्मको भवेत्, येन स्मृतिप्रलम्भाद् मोक्षप्राप्तिरसम्भवा प्रसज्येत। परं श्रुतिः "भिद्यते हृदयग्रन्थिः" (मुण्ड.उ.२।२।८) इति वदन्ती स्मृतेः साक्षात्काररूपतां समर्थयति। स्मृतिरेव पराभक्तिरूपेण परिणमते। इयं स्मृतिर्न केवलं ज्ञानस्य कश्चन प्रकारः, अपितु सा परमपुरुषस्य प्रसन्नतायाः द्वारमप्यस्ति। यदा जीवात्माऽनन्यभावेन परमात्मानं स्मरति, तदा तदीया स्मृतिः ध्यानपदेन व्यपदिष्टा सती मुक्तेरमोघं साधनं भवति। न्यायमते तु स्मृतेरीदृशं पारमार्थिकं महत्त्वं न दृश्यते, तत्र स्मृतिः केवलं लौकिकव्यवहारमर्यादायां बद्धा वर्तते।

अत एव विशिष्टाद्वैतदर्शने स्मृतिरातदाध्यात्मिकसोपानमप्यस्ति। "स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः" इति चान्दोग्योपनिषद्वाक्यमनुसृत्य, इयं ध्रुवानुस्मृतिरेवाविद्यातमो निवर्त्य जीवं परब्रह्मणि सन्निवेशयति। एवं स्मृतेः मोक्षोपायत्वं व्यवस्थाप्य, विशिष्टाद्वैतदर्शनं तस्याः प्रमारूपत्वं सुतरां प्रतिष्ठापयति। इयं स्मृतिः संविदः सा परा परिणतिः, या भक्तं साक्षात् भगवत्सान्निध्यं प्रापयति।

## विवेकविमोकादिसाधनसप्तकम्

विशिष्टाद्वैतदर्शने ध्रुवानुस्मृतिर्न सहसा समुत्पद्यते, अपितु सा विशिष्टसाधनानां परिपाकरूपेणैवाविर्भवति। श्रीभाष्यकारेण स्मृतिरूपोपासनाया ह्यङ्गतया साधनसप्तकमनिवार्यत्वेन प्रोक्तम्। यदुक्तं वाक्यकारेण- "तल्लब्धिविवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः सम्भवात्" (रामानुजः, १९९५: पृ.१०) इति। एतानि सप्त साधनानि स्मृतेः निर्मलत्वं निरन्तरत्वञ्च सम्पादयन्ति।

**विवेकः-** अत्र विवेको नाम कायशुद्धिः। दुष्टान्नवर्जनपूर्वकं सात्त्विकाहारेण चित्तस्य सत्त्वशुद्धिर्जायते, यया ध्रुवानुस्मृतिर्निष्पद्यते। आहारशुद्धौ सत्त्वशुद्धिः (छा.उ.) श्रुतिरस्याधारभूता।

**विमोकः-** कामानां परित्यागो विमोकः पदेन व्यपदिश्यते। विषयासक्तिं विहाय केवलं भगवन्निष्ठत्वं येन सिध्यति, स एव विमोकः स्मृतेर्दृढीकरणायावश्यकः।

**अभ्यासः**- आरब्धायाः स्मृतेः पुनः पुनरनुशीलनमभ्यासः। येन चित्तं विषयान्तरं न गच्छति, अपितु ध्येयवस्तुन्येव विलीयते।

**क्रिया-** पञ्चमहायज्ञादीनां शास्त्रीयकर्माणां यथाशक्ति ह्यनुष्ठानं क्रियापदार्थः। एषा क्रियान्तःकरणस्य कालुष्यं प्रक्षाल्य स्मृतिं प्रसादयति।

**कल्याणम्-** सत्य-आर्जव-दया-दान-अहिंसा-अस्तेयादीनि कल्याणपदेनाभिधीयन्ते। एते गुणा मुमुक्षोः स्मृतौ स्थैर्यं निदधति।

**अनवसादः-** दैन्यं विषादो वावसाद इति निगद्यते, तदभावोऽनवसादः। प्रतिकूलपरिस्थितिष्वपि चित्तस्याप्रसन्नतां निवार्य स्मृतेरविच्छिन्नत्वं रक्षितव्यम्।

**अनुद्धर्षः-** अतिसन्तोष उद्धर्षः। न उद्धर्षोऽनुद्धर्षः। अभीष्टप्राप्तावपि चित्तस्य समत्वं रक्षणीयम्, येन स्मृतावुद्वेगो न जायेत।

एतेषां सप्तसाधनानां साचिव्येनैव सा स्मृतिः ब्रह्मसाक्षात्काररूपा भवति। यदि एतानि साधनानि न स्युः, तर्हि स्मृतिः केवलं शाब्दज्ञानमात्रे पर्यवस्यति, न तु सा मोक्षप्रदायिनी भवेत्। विशिष्टाद्वैतसिद्धान्ते ह्येतेषां साधनानां सङ्ग्रहेण स्मृतेर्यथार्थत्वं तथा प्रकर्षश्चोभयमपि सिध्यति। एवं साधनसप्तकसंस्कृतेयं स्मृतिरेवान्ते पराभक्तिरूपेण परिणमते, या खलु भगवत्प्राप्तेः साक्षात् द्वारभूतास्ति।

## अन्यथाख्यातियथार्थख्यातिविश्लेषणम्

न्यायविशिष्टाद्वैतदर्शनयोः स्मृतिविषयकवैमत्यस्य मूलं बीजं ख्यातिवादे निहितं वर्तते। नैयायिका अन्यथाख्यातिमङ्गीकुर्वन्ति, यत्र स्मृतेः भ्रमरूपत्वं व्यवस्थाप्यते। तेषामयं राद्धान्तो यद्- "इदं रजतम्"

इति भ्रमात्मकबोधे पुरोवर्तिनि शुक्तिद्रव्ये देशान्तरस्थस्य रजतस्य स्मृतिद्वारा भानं जायते (मिश्रः, २००३: पृ.५४७)। अत्र स्मृतिः पूर्वगृहीतं रजतं देशान्तरकालान्तरसम्बद्धं सदन्यस्मिन् वस्तुन्यन्यथाऽवभासयति। ततश्च भ्रमो भवति । न्यायमते अत्र ज्ञानांशे याथार्थ्यं नास्ति, यतो हि सोऽर्थस्तत्र न विद्यते।

विशिष्टाद्वैतवेदान्ते तु यथार्थख्यातिरिति नितान्तं विलक्षणः सिद्धान्तः समुल्लसति। श्रीभाष्यकारः पञ्चीकरणप्रक्रियामाश्रित्य प्रत्यपादयत् यद्- "यथार्थं सर्वविज्ञानमिति वेदविदां मतम्" (रामानुजः, १९९५: पृ.७०) इति। तस्य मूलं छान्दोग्योपनिषदः-"तासां त्रिवृतं त्रिवृतं करवाणि" (६।३।३) इति वाक्यम्। । अस्मिन् सिद्धान्ते स्मृतेरपि सर्वथा याथार्थ्यमेव वर्ण्यते। शुक्तौ रजतभ्रमवेलायां रजतस्य सूक्ष्मांशाः तत्र विद्यन्त एव। अतः 'इदं रजतम्' इति ज्ञाने या स्मृतिर्जायते, सा न त्वसद्विषयिणी, नाप्यन्यथा-विषयिणी, अपि तु तत्र वर्तमानस्यैव सूक्ष्मांशस्य प्रकाशिका वर्तते। विशिष्टाद्वैतमते यदि ख्यातिर्यथार्था न स्यात्, तर्हि प्रवृत्तेः प्रामाण्यं विहन्येत। नैयायिकोक्तान्यथाख्यातिः स्मृतेः दोषत्वं कल्पयति, किन्तु विशिष्टाद्वैतदर्शने स्मृतिर्न दोषरूपापितु स्मृतिप्रमोषदोषाद्भिन्ना संवित्त्वेन गृह्यते। यदा वयं शुक्तौ रजतं स्मरामः, तदा सा स्मृतिः वस्तुगतयथार्थांशमेवावलम्बते, केवलं शुक्तित्वस्य तिरोधानात् साऽपूर्णा भासते, न तु मिथ्या।

एतावता न्यायमते ख्यातिर्वस्तुनोऽन्यथारूपेण भासनम् (स्मृतेः विपर्यासः), परं विशिष्टाद्वैतमते तु ख्यातिः वस्तुनः यथार्थरूपेणैव भासनम्, यत्र स्मृतिरपि स्वकीयं याथार्थ्यं न जहाति। इयमेव यथार्थख्यातिः स्मृतेः प्रमात्वं द्रढयति । नैयायिकोक्ता अन्यथाख्यातिः स्मृतेरप्रामाण्यं साधयितुं प्रयतते, परं विशिष्टाद्वैतसरणिस्तु स्मृतेः प्रत्येकमंशमपि यथार्थतया प्रकटयति। एवं ख्यातिद्वयस्य विश्लेषणाद्निर्गलति यत् संविदो भेदत्वेन प्रसिद्धा स्मृतिर्न भ्रमात्मिकापि तु यथार्थांशप्रकाशिनीति।

## निष्कर्षः

न्यायविशिष्टाद्वैतदर्शनयोः स्मृतिविषये गम्भीरालोडनेनेदं पर्यवस्यति यत् स्मृतेर्वैलक्ष्यण्यमुभयत्र प्रतिपादितम्। न्यायवैशेषिकदर्शने स्मृतिर्यद्यपि संस्कारजन्यत्वेन यथार्था संवित् स्वीक्रियते, तथापि यथार्थानुभवः प्रमा इति प्रमालक्षणस्य सङ्कोचात् सा प्रमाकोटौ न निविशते। तार्किकदृष्ट्या स्मृतेः पारतन्त्र्यमेव तस्याः प्रमात्वबाधे बीजत्वेन कल्प्यते। नैयायिकानां मते ज्ञानस्य यथार्थत्वं केवलमनुभवनिष्ठमेव भवति, स्मृतिस्तु पूर्वज्ञानोपजीविनी सती स्वातन्त्र्यं न भजते। एवं न्यायमते स्मृतिः केवलं व्यावहारिकप्रयोजने पर्यवस्यति, न तु साक्षादर्थजन्या सती स्वतन्त्रतया प्रमात्वं लभते। तत्र स्मृतेरप्रामाण्यप्रतिपादनं मुख्यतया प्रमालक्षणस्य व्याप्तिरक्षणाय कृतं दृश्यते, येनानुगतव्यवहारस्योपपत्तिः स्यात्।

अपरत्र विशिष्टाद्वैतवेदान्ते स्मृतेः प्रामाण्यं न केवलं तार्किकमर्यादया, अपितु आध्यात्मिक-अनुभूति-प्रक्रिययापि सुप्रतिष्ठितं वर्तते। अत्र ज्ञानस्य याथार्थ्यं सार्वत्रिकमिति हेतोः स्मृतिरपि प्रमात्वेन गृह्यते। वेदान्तदेशिकदृष्ट्या सुस्पष्टं जायते यत् पारतन्त्र्यं नाप्रामाण्यप्रयोजकम्, अपितु अर्थाविसंवादित्वमेव प्रामाण्यनियामकम्। यद्यनुमानं व्याप्तिज्ञानाधीनत्वात् प्रमाणं भवितुमर्हति, तर्हि स्मृतिरपि पूर्वानुभवाधीनत्वात् प्रमात्वं कथं न भजेत? इति। यथार्थख्यातिसिद्धान्तः स्मृतेर्भ्रमात्मकत्वं सर्वथा निरस्य तस्याः प्रत्येकं ज्ञानकणमंशतः सत्यत्वेनैवोपस्थापयति। अत्र स्मृतिर्न त्वसद्विषयिणी, नापि अन्यथाविषयिणी, अपि तु

वस्तुनो विद्यमानमेव यथार्थांशं प्रकाशयति स्मृतिः।

अस्य निगूढं रहस्यं तदा स्फुटीभवति यदा स्मृतेः मोक्षोपायत्वं विमृश्यते। ध्रुवानुस्मृतिरूपोपासना यद्यप्रमा स्यात्, तर्हि वेदान्तप्रोक्ता मुक्तिरेव मृषा प्रसज्येत। अतो विशिष्टाद्वैतदर्शने स्मृतिर्न केवलं पूर्वानुभवस्य प्रतिध्वनिः, अपितु सा साधनसप्तकसंस्कृता सती साक्षाद्भगवद्दर्शनसमानाकारा परा संविदस्ति। श्रीभाष्यकारस्य मते भक्तिर्नामाविच्छिन्ना स्मृतिसन्ततिरेव, या खलु साक्षात्काररूपतां भजते। इत्थं न्यायमते स्मृतेरप्रामाण्यमुपपाद्य विशिष्टाद्वैते तस्याः पारमार्थिकं प्रमात्वं व्यवस्थापितमित्यस्यालेखस्य निष्कृतिः। मुमुक्षोः कृते ज्ञानस्य याथार्थ्यं प्रतिपादयितुं नितरामावश्यकं वर्तते। एतावता संक्षेपेणोभयोर्दर्शन योर्विरोधाभासं परिहृत्य स्मृतेर्वास्तविकं स्वरूपमत्र व्यवस्थापितम् ।

## सन्दर्भसूची


आचार्यः उदयनः. (सन्२००५). *कुसुमाञ्जलिः,* पुनर्मुद्रितं संस्करणम्. (हरिदासभट्टाचार्यविरचितव्याख्याविभूषितः कुसुमाञ्जलिपरिमलहिन्दीव्याख्योपेतश्च, हिन्दीव्याख्याकारः श्रीमदाचार्यः विश्वेश्वर सिद्धान्तशिरोमणिः ). वाराणसी : चौखम्बा विद्याभवन।

*कल्याण.* (२०६९). उपनिषद् अङ्कः. त्रयोदशवर्षस्य विशेषाङ्कः. पृ. १६३-८०१।

गौतमः (सन् १९८६). *न्यायदर्शनम्.* भाष्य-वृत्तिसहितम्. दिल्ली : चौखम्वा संस्कृत प्रकाशन।

गौतमः (सन् १९६७). *न्यायदर्शनम्.* (वात्स्यायन-भाष्योद्योतकर-वार्त्तिक-वाचस्पति-तात्पर्यटीकोदयन-परिशुद्धिरूप-चतुर्ग्रन्थिकासमलङ्कृतम्. (सम्पा.ठक्कुरः, अनन्तलालः). दरभङ्गा : मिथिलाविद्यापीठम्।

देशिकः, वेदान्तः (सन् २००४). *तत्त्वमुक्ताकलापः.* (सर्वङ्कषाव्याख्यासहितः, व्याख्याता के. एस. वरदाचार्यः) . मैसुरु : आर्षग्रन्थप्रकाशनम्।

देशिकः, वेदान्तः (सन्१९२३). *न्यायपरिशुद्धिः.* वाराणसी : चौखम्बा संस्कृत सिरिज।

पाणिनिः (सन् १९९३). *अष्टाध्यायी.* शिवप्रसाद द्विवेदी (सं.). वाराणसी : भारतीय विद्याप्रकाशनम्।

प्रशस्तपादाचार्यः (२०७८). प्रशस्तपादभाष्यम्. नेपाली अनुवाद तथा तात्पर्यचन्द्रिका व्याख्यासमेत. (व्याख्याकारः केशवशरण अर्याल). काठमाण्डौः नेपाल प्रज्ञाप्रतिष्ठान।

प्रशस्तपादाचार्यः (सन् १९९७). *प्रशस्तपादभाष्यम्.* द्वितीयं संस्करणम्. श्रीधराचार्यकृततन्याय–कन्दलीयुतम्. (सम्पादकः हिन्दीव्याख्याकार– श्रीदुर्गानन्द झा). वाराणसी : सम्पूर्णानन्द संस्कृत विश्वविद्यालयः।

भट्टः, अन्नम्. (सन् १९८५). *तर्कसंग्रहः.* (न्यायबोधिन्याः संस्कृत-हिन्दीकलाद्वयव्याख्यया पदकृत्यस्य हिन्दीटिप्पणेन चोपेतः, व्याख्याकारः आचार्यः केदारनाथत्रिपाठी). दिल्ली : मोतिलाल वनारसीदास।

भट्टाचार्यः, विश्वनाथः. (२०६८). *न्यायसिद्धान्तमुक्तावली.* किरणावलीसहिता, (व्या. कृष्णवल्लभाचार्यः).

वाराणसी : चौखम्वासंस्कृतसंस्थानम्।

मिश्रः, केशवः. (सन् २००३ ). *तर्कभाषा.* ‘माथुरी’ हिन्दीव्याख्योपेता (व्याख्याता गजाननशास्त्री मुसलगाँवकरः), पुनर्मुद्रितं संस्करणम्. वाराणसी: चौखम्बाविद्याभवनम्।

मिश्रः, शङ्करः. (सन् १९६९). *वैशेषिकसूत्रोपस्कारः.* प्रकाशिका हिन्दीव्याख्योपेतः. (व्याख्याकारः ढुण्ढिराज शास्त्री सम्पादकः श्री नारायण मिश्रः). वाराणसी: संस्कृत सिरिज।

रामानुजाचार्यः. (सन् १९९५). *श्रीभाष्यम्.* (सम्पादकः एम्. ए. लक्ष्मीताताचार्यः) यादवाद्रिः. मेलुकोटे : संस्कृतसंशोधनसंसद्।

वात्स्यायनः. (सन् १९९८). *न्यायभाष्यम्.* प्रसन्नपदापरिभूषितम् (व्याख्याता सुदर्शनाचार्यः). अभिनवसंस्करणम्. वाराणसी : बौद्धभारती।

श्रीनिवासाचार्यः. (२०७७). *यतीन्द्रमतदीपिका.* (पदपदार्थ, भावार्थसहित श्रीयोगिराजमुखोल्लासिनी नेपाली व्याख्या, व्याख्याकारः केशवाचार्यः). अमेरिका : अन्तर्राष्ट्रिय श्रीसम्प्रदाय मञ्च।